# Durgadevi-Dashakam

# दुर्गादेवी-दशकम्

## Document Information

Text title : Durgadevi-Dashakam

File name : durgAdevIdashakam.itx

Category : devii, devI, durgA, dashaka, hkmeher

Location : doc_devii

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Included in Svastikavitanjali Gitikavya

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 23, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 23, 2023

*sanskritdocuments.org*

# दुर्गादेवी-दशकम्

जय महेश्वरी विश्व-तारिणी
त्वमसि दुर्गते-ध्वंसकारिणी ।
कलुष-हारिणी दैत्यदारिणी
जय पराम्बिके ! धर्मधारिणी ॥ १॥

त्वमसि भारती भक्तवत्सला
जयसि पार्वती सर्व-पुष्कला ।
त्वमसि वैष्णवी जिष्णु-वन्दिता
वितर सन्मतिं त्वं महोर्जिता ॥ २॥

भगवती शिवा त्वं त्रिशूलिनी
महिषमर्दिनी सिंह-वाहिनी ।
जयसि भैरवी भूरि-विक्रमा
सुकरुणामयी त्वं मनोरमा ॥ ३॥

वृजिन-भञ्जिनी मञ्जुलानना
सुजन-रञ्जिनी कञ्ज-लोचना ।
जगति पूजिता गर्व-गञ्जिनी
भवतु ते कृपा शान्ति-शिञ्जिनी ॥ ४॥

जयसि पालिका पुण्य-सत्कृताम्,
त्वमसि कालिका घोर-दुष्कृताम् ।
जयसि चण्डिका चण्ड-मुण्डहा
त्वमिह शाम्भवी दम्भ-दर्पहा ॥ ५॥

धरणि-शोधने त्वं धुरन्धरा
तव शुभागमे शोभिता धरा ।
अघ-विघातिनी राघवार्चिता
भुवि विभासि वै दिव्यभूषिता ॥ ६॥

अहमिकाङ्किते मामकान्तरे
दुरित-शङ्किते पङ्किलोदरे ।
भवतु ते दया-वारि-सेचनम्,
जननि ! मार्जनं भक्ति-सर्जनम् ॥ ७॥

हर हरप्रिये ! दुःखमापदम्,
वितर सौभगं नौमि ते पदम् ।
अभयदायकं नाम ते वरम्,
दशभुजे ! भजे देवि ! सादरम् ॥ ८॥

त्वमसि पावनी पर्व तावकम्,
दशहरास्ति वै स्वस्ति-भावकम् ।
गिरिश-सङ्गिनी गौरि ! मङ्गला
कुरु पदार्पणं दीप्तमुज्ज्वला ॥ ९॥

शरणवत्सले ! शारदोत्सवे
स्मरणमेव ते तापहं भवे ।
तव शुभास्पदे भास्वरे पदे
प्रणतिरस्तु मे देवि ! शं-प्रदे ॥ १०॥

(इति श्रीहरेकृष्णमेहेर-प्रणीतं दुर्गादेवी-दशकं सम्पूर्णम् ।)
(छन्दोमञ्जरी-वर्णिता इन्दिरा इति छन्दसा विरचितम् ।
भागवत-“गोपीगीतम्” अनेन छन्दसा प्रणीतमस्ति ।)

– रचयिता : डॉ हरेकृष्ण-मेहेरः

Copyright Dr.Harekrishna Meher

*Durgadevi-Dashakam*
pdf was typeset on October 23, 2023

Please send corrections to *sanskrit@cheerful.com*